# Vishvarupaprakatanam

# विश्वरूपप्रकटनम्

## Document Information

Text title : vishvarUpaprakaTanam

File name : vishvarUpaprakaTanam.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Latest update : January 3, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# विश्वरूपप्रकटनम्

सम्पूर्णाकारबोधस्तव खलु गमितो मोक्ष इत्यात्मविद्भिः
तत्पादं ते पदाब्जं मुरहरभुवनाकारमित्यागमोक्तम् ।
तस्मान्मोहोपशान्त्या तदुपरि भगवन् लब्धुमेवामृतत्वं
भूमन् पादाम्बुजातं तव मुनिततिभिर्मृग्यते युक्तमेतत् ॥ १॥

सर्वान् लोकान् स्वसङ्गाद्दुरितगुरुभरात्पावयन्त्याः प्रकामं
स्वर्धुन्यास्ते पदाब्जं किल भवति भवस्थानमाश्चर्यधाम ।
क्षन्तव्यप्रार्थनायां पदपतनमिव श्रेय अन्यन्न चास्ति
नत्यर्थश्चापि पूर्णः पदभजनविधेस्तत्पदाब्जं विशिष्टम् ॥ २॥

विज्ञानं जायमानं श्रुतिशिखरगिरां तत्त्वमस्यादिवाक्यात्
तद्वाक्यार्थप्रतीतिं प्रथमतरमपेक्षेत सा तत्पदार्थम् ।
पादं ते यत्समस्तत्रिभुवनमयमित्यूर्ध्वतश्चामृतत्वं
तत्त्वं रूपौ मुरारे तव पदकमलं त्वं पदार्थस्तदन्यत् ॥ ३॥

धीरः कश्चिन्मनीषी शिखरमुरुसमारोढुकामः पदाभ्यां
सोपानानां पदानि क्रममनु स पुमान् लङ्घयन्नेव याति ।
प्राथम्येन त्वदङ्घ्रिं भजत उरुपदं लभ्यते हि क्रमेण
तत्पादाब्जं प्रपन्नो विहरति भवतो धाम्नि हृद्येन वद्ये ॥ ४॥

सौधन्याधारभूमिः कथमिव तदवस्थापने हेतुभूत-
स्तद्वद्देव त्वदङ्घ्रिस्तव शुभवपुषो धारणे मूलभूतः ।
तद्भो! संसारभीतिप्रशमननिपुणं स्वर्गगङ्गामरन्दं
देव त्वत्पादपद्मं सुबहु विजयते सच्चिदानन्दसारम् ॥ ५॥

द्वैतं मिथ्येति तत्त्वं तदितरदनघं बह्वसत्यं ततस्त्वं
मातर्द्वैते विमुग्धा मम किल महितां नैव जानासि भूतिम् ।
सोऽहं वै वासुदेवस्तव सुतपदवीं प्राप्तवानप्यहो ते
मोहः कोवेति चेष्टा विलसितवचसा व्यङ्गुलोनो बभासे ॥ ६॥

शुद्धं धामाम्ब तत्त्वं तदितरमलिनस्वान्तमूढाभिगम्यं
    नैवेतीव प्रजेशां कलुषितहृदयामीर्ष्यया बद्धुकामाम् ।
श्रान्तां नष्टोरुमोहां यदुपतिरनुशासन् बभौ ब्यङ्गुलोनः
    कारुण्यं नष्टमोहे किल लसति हरेस्सत्यनिष्ठे सुभद्रे ॥ ७॥

आत्मानात्माविवेकात्कलुषितधिषणं देव्यहं देवदेवे
    मायापाशेन गाढं भवगहनपथे सन्निबध्य क्षिपामि ।
तं मानन्तं कथं वा दधिमथनगुणेनाप्रमेयं निबद्धुं
    मोहस्ते तत्त्वबोधाद्विलयमुपनयाम्येष गृह्णीष्व कामम् ॥ ८॥

तौ  द्वेषौ नरस्य प्रथमतररिपू तत्कृता घोरदुःख-
    पीडा संसारवार्धौ तदिह किल तयोर्नैव गच्छेद्वशत्वम् ।
ताभ्यां मुक्तो हि भक्तः प्रभवति पुरुधा सन्तमीशं हरिं मा-
    मित्येवं ब्यङ्गुलोनः स्वयमुपदिशतीवात्र नाट्यं चकार ॥ ९॥

यो वा दुःखं सुखं वा जयमपजयमप्यायमम्ब व्ययं वा
    शीतं वोष्णं सखायं तदितरमपि वा सम्पदं वाऽऽपदं वा ।
ध्यायन् साम्येन नित्यं प्रशमितनिखिलद्वन्द्वधर्मो भवेद्वा
    तद्वश्योऽहं भवेयं न तु विषममतेरित्यशं ब्यङ्गुलोनम् ॥ १०॥

मृत्स्नामत्सीति मातुर्वचनमुपनिशम्यैव देवः प्रकामं
    वक्त्रं व्यादाय लोकं सकलमपि विभुर्दर्शयामास मोदात् ।
कुक्षौ मे भूतजालं निखिलमपि वसत्येव किं तन्मृदा मे
    भुक्तेनापीति देवः स्वकमहिमभरं नाट्यतस्सुव्यनक्ति ॥ ११॥

बालाः कामं ममेदं विलसितमधिकश्रद्धया पश्यतेति
    मृत्स्नामादाय मोदात्सरभसमहहो भुक्तवान् गोपबालः ।
सर्वं लोकं युगान्ते सगिरिवननदीसागरार्केन्दुतारं
    सामोदं खादतो मे कियदिदमिति तान् योऽजगादेवदेवः ॥ १२॥

प्रायो बालयथेव स्वविहृतिशरणाः पांसुपङ्कादिलीला-
    मृद्भक्षास्तद्वदीशः कपटनरवपुर्मायया मोहयंस्तु ।
मृत्स्नां खादन् स्वमातुस्स्वकशिशुधिषणादूषितायाः प्रबोधं
    कर्तुं वक्त्रे मुकुन्दस्सकलभुवनमप्याशु साक्षाच्चकार ॥ १३॥

जायन्ते सर्वभूतान्यपि निखिलगुरोर्मत्त एतानि जीव-

न्त्यन्ते मय्येव यान्ति प्रलय इति विदं स्वस्य नाट्येन कुर्वन् ।
मद्भक्ता मर्त्यभावं मम किल मनसा विस्मरन्तो भजध्वं
शङ्का चेत्स्याज्जनन्यै मम मुखकुहरे दर्शितं चिन्तयन्तु ॥ १४॥

ग्लानिर्धर्मस्य वृद्धिर्दुरितसमुदयस्यापि यर्ह्येव भूयात्
तर्ह्येवाहम्प्रकाशो दुरिततिमहं नाशयाम्येव शक्त्या ।
नाहं मर्त्यो महेशः किल मयि कलिलं मा कुरुध्वं जना इ-
त्यम्बाया विश्वरूपप्रकटनसरणिं बोधयामास देवः ॥ १५॥

इति विश्वरूपप्रकटनं सम्पूर्णम् ।

Encoded and proforead by PSA Easwaran psaweswaran at gmail.com

*Vishvarupaprakatanam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*